श्री प्रत्यंगिरा स्तवराजः

श्री प्रत्यंगिरा स्तवराजः

अस्य श्री प्रत्यंगिरा उग्रकृत्यादेवी महामंत्रस्य प्रत्यंगिरा ऋषिः अनुष्टुप्छंदः श्री शक्तिः प्रत्यंगिरा उग्रकृत्यादेवी देवता ह्रीं बीजं क्रों शक्तिः श्रीं कीलकं मम सर्वशत्रुसंहरणार्थे परमंत्र परयंत्र परतंत्र परकर्म परविद्याद्याभिचारिक विधान विनाशार्थे मम सहकुटुंबस्य सपुत्रकस्य सबांधवस्य सपरिवारस्य क्षेम स्थैर्यायुरारोग्यैश्वराभिवृद्ध्यर्थे श्री प्रत्यंगिरा महादेवी प्रसाद सिद्ध्यर्थे प्रत्यंगिरा मंत्र जपे विनियोगः |

करन्यासः –
ॐ अं ह्रां ह्रीं सहस्रवदनायै आं अंगुष्ठाभ्यां नमः |
ॐ इं ह्रीं ह्रीं अष्टादशभुजायै ईं तर्जनीभ्यां नमः |
ॐ उं ह्रूं ह्रीं त्रिनेत्रायै ऊं मध्यमाभ्यां नमः |
ॐ एं ह्रैं ह्रीं रक्तमाल्यांबरधरायै ऐं अनामिकाभ्यां नमः |
ॐ ॐ ह्रौं ह्रीं सर्वाभरणभूषितायै औं कनिष्ठिकाभ्यां नमः |
ॐ अं ह्रः ह्रीं महाभयनिवारणायै अः करतलकरपृष्ठाभ्यां नमः |

हृदयादिन्यासः –
ॐ अं ह्रां ह्रीं सहस्रवदनायै आं हृदयाय नमः |
ॐ इं ह्रीं ह्रीं अष्टादशभुजायै ईं शिरसे स्वाहा |
ॐ उं ह्रूं ह्रीं त्रिनेत्रायै ऊं शिखायै वषट् |
ॐ एं ह्रैं ह्रीं रक्तमाल्यांबरधरायै ऐं कवचाय हुम् |
ॐ ॐ ह्रौं ह्रीं सर्वाभरणभूषितायै औं नेत्रत्रयाय वौषट् |
ॐ अं ह्रः ह्रीं महाभयनिवारणायै अः अस्त्राय फट् |

ध्यानम् –
सहस्रवदनां देवीं शतबाहूं त्रिलोचनां
रक्तमाल्यांबरधरां सर्वाभरणभूषिताम् |
शक्तिं प्रत्यंगिरां ध्यायेत् सर्वकामार्थसिद्धये
नमः प्रत्यंगिरां देवी प्रतिकूलनिवारिणीम् |
मंत्रसिद्धिं च तां देवीं चिंतयामि हृदंबुजे |
प्रत्यंगिरां शापहरं भूतप्रेतविनाशिनीम् |
चिंतयेदुग्रकृत्यां तां परमैश्वर्यदायिनीम् | |

मनुः –

ॐ ह्रीं ईं ग्लौं श्रीं सौं ऐं हुं नमः कृष्णवाससे शतसहस्रसिंहवदने अष्टादशभुजे महाबले शतपराक्रमपूजिते अजिते अपराजिते देवि प्रत्यंगिरे परसैन्य परकर्म विध्वंसिनि परमंत्रच्छेदिनी परयंत्रपरतंत्रोच्चाटनि परविद्याग्रासकरे सर्वभूतदमनि क्षं ग्लौं सौं ई ह्रीं क्रीं क्रां एह्येहि प्रत्यंगिरे चिदचिद्रूपे सर्वोपद्रवेभ्यः सर्वग्रहदोषेभ्यः सर्वरोगेभ्यः प्रत्यंगिरे मां रक्ष रक्ष ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः क्षां क्षीं क्षूं क्षैं क्षौं क्षः ग्लां ग्लीं ग्लूं ग्लैं ग्लौं ग्लः प्रत्यंगिरे परब्रह्ममहिषि परमकारुणिके एहि मम शरीरे आवेशय आवेशय मम हृदये स्फुर स्फुर ममांसे प्रस्फुर प्रस्फुर सर्वदुष्टानां वाचं मुखं पदं स्तंभय स्तंभय जिह्वां कीलय कीलय बुद्धिं विनाशय विनाशय प्रत्यंगिरे महाकुंडलिनि चंद्रकळावतंसिनि भेताळवाहने प्रत्यंगिरे कपालमालाधारिणि त्रिशूल वज्रांकुश बाण बाणासन पाणिपात्रपूरितं मम शत्रु शोणितं पिब पिब मम शत्रु मांसं खादय खादय मम शत्रून् ताडय ताडय मम वैरिजनान् दह दह मम विद्वेषकारिणः शीघ्रमेव भक्षय भक्षय श्रीप्रत्यंगिरे भक्तकारुणिके शीघ्रमेव दयां कुरु कुरु सद्यो ज्वरजाड्यमुक्तिं कुरु कुरु भेताळब्रह्मराक्षसादीन् जहि जहि मम शत्रून् ताडय ताडय प्रारब्धसंचितक्रियमानान् दह दह दूषकान् सद्यो दीर्घरोगयुक्तान् कुरु कुरु प्रत्यंगिरे प्राणशक्तिमये मम वैरिजनप्राणान् हन हन मर्दय मर्दय नाशय नाशय ॐ श्रीं ह्रीं क्रीं सौं ग्लौं प्रत्यंगिरे महामाये देवि देवि मम वांछितं कुरु कुरु मां रक्ष रक्ष प्रत्यंगिरे स्वाहा ||

अथ स्तवराज स्तोत्रम् –

मंत्रयंत्रसुखासीनं चंद्रचूडं महेश्वरम् |
सहसागत्य चरणे पार्वती परिपृच्छति ||

ईश्वर उवाच |

धारणीं परमां विद्यां प्रत्यंगिरां महोत्तमाम् |
यो जानाति स्वहस्तेन सर्वं साध्यं हि जिह्वया ||

अमृतं पिबते तस्य मृत्युर्नास्ति कदाचन |
त्रिपुरां च समायातां सेमां विद्यां च बिभ्रतीम् ||

निर्जिताश्चामराः सर्वे देवी विद्याभिमानिनी |
गोळकं संप्रवक्ष्यामि भैषज्यमिव धारणात् ||

त्रिवृतं धारयेन्मंत्रं प्रत्यंगिरः सुभाषितम् |
हरिचंदनमिश्रेण रोचनैः कुंकुमेन च ||

लिखित्वा भूर्जपत्रेण धारणीयं सदा नृपैः |
पुष्पधूपविचित्रैश्च भक्ष्यभोज्यैर्निवेदनम् ||

पूजयित्वा यथान्यायं सप्तकुंभेन वैष्णवीम् |
य इमां धारयेद्विद्यां लिखित्वा रिपुनाशिनीम् |
विलयं यांति रिपवः प्रत्यंगिरा सुधारणात् | |

अथ मंत्रपदानि भवंति –
ॐ नमः सूर्यसहस्रेक्षणाय, ॐ अनादिरूपाय, ॐ पुरुहूताय, ॐ महेश्वराय, ॐ जगच्छांतिकारिणे, ॐ शांताय, ॐ महाघोराय, ॐ अतिघोराय, ॐ प्रभव प्रभव, ॐ दर्शय दर्शय, ॐ मर्दय मर्दय, ॐ हिलि हिलि हिलि, ॐ किलि किलि किलि, ॐ ज्वल ज्वल ज्वल, ॐ ग्रस ग्रस ग्रस, ॐ पिब पिब पिब, ॐ नाशय नाशय नाशय, ॐ जनय जनय जनय, ॐ विदारय विदारय विदारय, देवि देवि मां रक्ष रक्ष रक्ष, ह्रीं देवि देवि पिशाच किन्नर किंपुरुष उरग विद्याधर रुद्र गरुड गंधर्व यक्ष राक्षस लोकपालान् स्तंभय स्तंभय स्तंभय, ये च शत्रवश्चाभिचार कर्तारस्तेषां शत्रूणां मंत्र यंत्र तंत्राणि चूर्णय चूर्णय चूर्णय, घातय घातय घातय, विश्वमूर्तिं महामूर्तिं जय जय जय, मम शत्रूणां मुखं स्तंभय स्तंभय स्तंभय, मम शत्रूणां पादं स्तंभय स्तंभय स्तंभय, मम शत्रूणां गुह्यं स्तंभय स्तंभय स्तंभय, मम शत्रूणां जिह्वां स्तंभय स्तंभय स्तंभय, मम शत्रूणां स्थानं कीलय कीलय कीलय, मम शत्रूणां ग्रामं कीलय कीलय कीलय, मम शत्रूणां देशं कीलय कीलय कीलय, ये च पाठकस्य परिवारकास्तेषां शांतिं कुरु कुरु स्वाहा | |

ॐ नमो भगवति उच्छिष्टचांडालि त्रिशूलवज्रांकुशधारिणि नररुधिरमांसभक्षिणि कपालखट्वांगधारिणि मम शत्रून् दह दह ग्रस ग्रस पिब पिब खाहि खाहि नाशय नाशय हूं फट् स्वाहा | |

ॐ ब्रह्माणि मम नेत्रे रक्ष रक्ष स्वाहा |
ॐ कौमारि मम वक्षःस्थलं रक्ष रक्ष स्वाहा |
ॐ वाराहि मम हृदयं रक्ष रक्ष स्वाहा |
ॐ इंद्राणि मम नाभिं रक्ष रक्ष स्वाहा |
ॐ चंडिके मम गुह्यं रक्ष रक्ष स्वाहा |
ॐ मेघवाहने मम ऊरुं रक्ष रक्ष स्वाहा |
ॐ चामुंडि मम जंघे रक्ष रक्ष स्वाहा |
ॐ वसुंधरे मम पादौ रक्ष रक्ष स्वाहा | |

ॐ झः झः झः ॐ थः थः थः ॐ स्फ्रैं स्फ्रैं ॐ स्तंभय स्तंभय क्षोभय क्षोभय हूं फट् स्वाहा | |

शक्तिध्यानम् –
स्तंभिनीं मोहिनीं चैवोच्चाटनीं क्षोभिणीं तथा |
जृंभिणीं द्राविणीं रौद्रीं तथा संहारिणीं शुभाम् | |

शक्तयः क्रम योगेन शत्रुपक्षे नियोजिताः |
धारिताः साधकेंद्रेण सर्वशत्रुनिवारिणी ||

ॐ स्तंभिनि ष्वेग्निं ष्वेग्निं मम शत्रून् स्तंभय स्तंभय हूं फट् स्वाहा |
ॐ मोहिनि ष्वेग्निं ष्वेग्निं मम शत्रून् मोहय मोहय हूं फट् स्वाहा |
ॐ उच्चाटनि ष्वेग्निं ष्वेग्निं मम शत्रून् उच्चाटय उच्चाटय हूं फट् स्वाहा |
ॐ क्षोभिणि ष्वेग्निं ष्वेग्निं मम शत्रून् क्षोभय क्षोभय हूं फट् स्वाहा |
ॐ जृंभिणि ष्वेग्निं ष्वेग्निं मम शत्रून् जृंभय जृंभय हूं फट् स्वाहा |
ॐ द्राविणि ष्वेग्निं ष्वेग्निं मम शत्रून् द्रावय द्रावय हूं फट् स्वाहा |
ॐ रौद्रि ष्वेग्निं ष्वेग्निं मम शत्रून् संतापय संतापय हूं फट् स्वाहा |
ॐ संहारिणि ष्वेग्निं ष्वेग्निं मम शत्रून् संहारय संहारय हूं फट् स्वाहा |
ॐ सर्वसंहारकारिणि महाप्रत्यंगिरे सर्वशस्त्रोन्मूलनि स्वाहा ||

इति श्रीरुद्रयामळे श्रीशूलपाणि विरचित सर्वशक्ति श्री प्रत्यंगिरा स्तवराजः ||